ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8 ]
Total No. of Printed Pages : 8 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]
Total No. of Questions : 45 ]

ಸಂಕೇತ ಸಂಖ್ಯೆ: **16-S**

**Code No. : 16-S**

# A

**CCE RF**
**CCE RR**
**REVISED**

Question Paper Serial No. **21**

इतः कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुम् इतः कर्तयत

Tear here

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ & ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh & Regular Repeater)**

ದಿನಾಂಕ : 27. 03. 2020 ] [ Date : 27. 03. 2020

ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-45 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-45 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

### *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 45 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचना:*

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।



https://www.karnatakaboard.com/

I. **अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरण सह लिखत ।** $6 \times 1 = 6$

1. 'पत्नी' अस्य समानार्थकपदम् इदं भवति ।

   (A) आर्या (B) चर्या

   (C) भार्या (D) सपर्या ।

2. 'शुक्लः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) श्वेतः (B) धवलः

   (C) शुभ्रः (D) कृष्णः ।

3. 'राजा' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) राज्ञी (B) राणी

   (C) राजनि (D) राज्ञि ।

4. 'वक्ष्यामि' अत्र एषः लकारः वर्तते ।

   (A) लट् लकारः (B) लृट् लकारः

   (C) लिट् लकारः (D) लोट् लकारः।

5. डा० सत्यव्रतशास्त्रिमहोदयः लाहोर्नगरे अजायत । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

   (A) कदा (B) कति

   (C) कथम् (D) कुत्र ।

6. एषु व्याकरणशुद्धं वाक्यम् इदं भवति ।

   (A) वीराय युद्धं रोचते । (B) वीरस्य युद्धं रोचते ।

   (C) वीरे युद्धं रोचते । (D) वीरेण युद्धं रोचते ।



https://www.karnatakaboard.com/

II. **चतुर्थ पदं लिखत ।** $4 \times 1 = 4$

7. रमणः – महर्षि :: गणपतिः – ........................।

8. इदं जगतः – ईशावास्यम् :: कस्यस्विद्धनम् – .......................... ।

9. रसरत्नाकरः – नागार्जुनः :: अष्टाङ्गसङ्ग्रहः – .......................... ।

10. शरणागतः – राजारामः :: अभयदायिनो – .......................... ।

III. **एकवाक्येन उत्तरं लिखत ।** $7 \times 1 = 7$

11. दधीचि महर्षेः आश्रमः कुत्र आसीत् ?

12. तृषितः चकोरः कम् आश्रयति ?

13. किं किं शाश्वतं तिष्ठति ?

14. नाट्ये कति रसाः सन्ति ?

15. उप्तं बीजं केन विना निष्फलं भवति ?

16. हिमलिङ्गं कदा दर्शनयोग्यं भवति ?

17. भगवानरमणमहर्षेः पितुः नाम किम् ?

IV. **द्वित्रैः वाक्यैः उत्तरं लिखत ।** $4 \times 2 = 8$

18. तैत्तिरीये सूर्यस्य विषये किं लिखितमस्ति ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. 'भारतीयभावना' इति पद्ये कविः कीदृशीं मातरं नमामि इति वदति ?

21. कैः षड्भिः निदानैः रोगाः सम्भवन्ति ?



https://www.karnatakaboard.com/

V. **सूचनानुसारम् उत्तरं लिखत ।** 4 × 2 = 8

22. सन्धिं विभज्य नाम लिखत ।

a) कुबुद्धिरेषा

b) आत्मन्येव ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाशक्ति

b) चक्रपाणिः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) वर्षं वर्षं प्रति =

b) हरिश्च हरश्च =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) त्वया अद्य पाठः पठनीयः ।

b) गुरुम् अनुसृत्य छात्राः गच्छन्ति ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकेन पाठः पठ्यते ।

b) पिता कार्यालयं गच्छति ।

VI. **संस्कृतभाषया अनुवादं कुरुत ।** 1 × 2 = 2

26. ದೊಡ್ಡ ನಗರಗಳಲ್ಲಿ ಇಂದು ಎಲ್ಲ ಕಡೆ ವಿಭಿನ್ನವಾದ ಮಾಲಿನ್ಯಗಳು ಕಂಡುಬರುತ್ತವೆ. ಜನರು ಇವುಗಳಿಂದ ಅನಾರೋಗ್ಯವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ.

Now-a-days different types of pollutions are found in the large cities. Due to this people are facing health regards.

VII. **कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** 1 × 2 = 2

27. जगति जनाः अनेकाः भाषाः भाषन्ते । तासु अत्यन्तप्राचीनतमा मधुरा च संस्कृतभाषा अस्ति ।



https://www.karnatakaboard.com/

VIII. **यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** 4 × 3 = 12

28. याचको भूत्वा अत्र अहम् आगतः ।

    कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

29. भवानेव संस्कृतेन ग्रन्थान् लिखतु ।

    कः पाठः ? कः अवदत् ? कम् अवदत् ?

30. किन्तु भवन्तं परिश्रान्तं पश्यामि ।

    कः पाठः ? का अवदत् ? अत्र परिश्रान्तः कः ?

31. रसे गन्धे न रज्यते ।

    कः पाठः ? कः अवदत् ? कः न रज्यते ?

**अथवा**

किंस्वित् श्रेष्ठतरं भवेत् ?

कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

IX. **कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 2 × 3 = 6

32. भासः ।

33. कालिदासः ।

X. **पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्गलभाषया वा लिखत ।** 3 × 3 = 9

34. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।

    सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता

    भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।

    आदितश्च मध्यतस्तथान्ततश्च भारताः

    भारतीयभावनेति वृद्धिमेतु भारते ।।



https://www.karnatakaboard.com/

36. रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।

जुगप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ।।

**अथवा**

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।

दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।।

XI. **वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत ।** $1 \times 3 = 3$

37. सौजन्यमेव सुवर्णम् ।

**अथवा**

मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः ।

XII. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** $1 \times 3 = 3$

38. वनभुवि तनुमात्रत्राणमाज्ञापितं मे ।

XIII. **पद्यं पूरयत ।** $1 \times 4 = 4$

39. न चोरहार्यं ..........................................................................................

..........................................................................................................।

..........................................................................................................

.............................................................................................. प्रधानम् ।।

XIV. **दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** $3 \times 4 = 12$

40. किमर्थं मुञ्जः भोजं मारयितुं यतते ?

41. हनुमतः जननं बाल्यवृत्तान्तं च पद्यानुगुणं लिखत ।

42. ध्रुवकथां पाठानुगुणं सङ्गृह्य लिखत ।

**अथवा**

अमरनाथगुहाविषये का पुराणकथा अस्ति ?



https://www.karnatakaboard.com/

XV. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** 4 × 1 = 4

43. बाल्यावस्था मनुष्यस्य जीवितकाले प्रमुखा इति उच्यते । सः कालः मनुष्यस्य भविष्यस्य बीजरूपम् । बहूनां महानुभावानां बाल्यजीवनं क्लेशमयं दृश्यते । परन्तु ये सर्वान् क्लेशान् अनुभूय परिहृत्य वा जीवनसङ्ग्रामे यशः प्राप्नुवन्ति ते एव महापुरुषाः इति कथ्यन्ते । तादृशेषु सर०एम्० विश्वेश्वरय्यः अपि अन्यतमः । सः महोदयः चिक्कबल्लापुरमण्डलस्य मुद्देनहल्ली इति लघुग्रामे अजायत । बाल्यादेव सः चतुरमतिरासीत् । सः अतीवपरिश्रमेण सम्यगधीत्य अभियन्तृ-पदवीम् अलभत । सः मैसूरुमहाराजेन सर्वकारस्य प्रधान अभियन्तृरूपेण नियुक्तः अभवत् । कन्नम्बाडी जलबन्धस्य मैसूरुविद्यालयस्य च निर्माणं स एव कृतवान् ।

**प्रश्नाः**

i) महानुभावानां बाल्यजीवनं कथं दृश्यते ?

ii) के महापुरुषाः इति कथ्यन्ते ?

iii) विश्वेश्वरय्यमहोदयः कुत्र अजायत ?

iv) कन्नम्बाडी जलबन्धस्य निर्माता कः ?

XVI. **पत्रं लिखत ।** 1 × 5 = 5

44. विजयपुरमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा नूतनगृहप्रवेशस्य निमित्त दिनद्वयस्य विरामं सम्प्रार्थ्य वर्गशिक्षकं प्रति विरामपत्रं लिखत ।

**अथवा**

'महाभारतम्' इति पुस्तकं प्रेषयितुं निवेद्य काशीनगरस्य चौकाम्बाप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

XVII. 45. **दशवाक्यैः प्रबन्धं लिखत ।** 1 × 5 = 5

सङ्गणकयन्त्रम्

**अथवा**

राष्ट्रियोत्सवाः ।



https://www.karnatakaboard.com/

https://www.karnatakaboard.com/